एकादशः पाठः

# भारतेनास्ति मे जीवनं जीवनम्

**आचार्यः** छात्राः! एकां प्रहेलिकां पृच्छामि।

**छात्राः** अहो प्रहेलिका! पृच्छतु भवान्। वयं सन्नद्धाः।

**आचार्यः** अधोलिखितात् वर्णजालात् नदीनां पर्वतानां नमानि चिनुत

| | | | | |
|---|---|---|---|---|
| अ | बु | दः | * | गं |
| रा | च | न्द्र | भा | गा |
| व | य | मु | ना | है |
| लिः | वि | न्ध्यः | मा | * |
| नी | ला | द्रिः | ह्या | स |

**छात्राः** पूर्णरूपेण न ज्ञायते।

**आचार्यः** पाठे दत्तान् श्लोकान् पठत। ततः एतां पूरयत।

**रविः** आचार्यवर! एतानि पद्यानि तु मया दूरदर्शनतः श्रुतानि, अपि च चित्राणि अपि दृष्टानि।

**आचार्यः** साधूक्तम्! एतानि पद्यानि ''भाति मे भारतम् '' इति गीतिकाव्यात् सङ्गृहीतानि।

**छात्राः** तर्हि गायामः वयम् एतानि पद्यानि।

एकादशः पाठः

# भारतेनास्ति मे जीवनं जीवनम्

विन्ध्यसह्याद्रिनीलाद्रिमालान्वितं
शुभ्रहैमाद्रिहासप्रभापूरितम्।
अर्बुदारावलीश्रेणिसम्पूजितम्
भूतले भाति मेऽनारतं भारतम्॥ 1॥


जाह्नवीचन्द्रभागाजलैः पावितम्
भानुजानर्मदावीचिभिर्लालितम्।
तुङ्गभद्राविपाशादिभिर्भावितम्
भूतले भाति मेऽनारतं भारतम्॥ 2॥

वेदभाभासितं सत्कलालालितं
रम्यसङ्गीतसाहित्यसौहित्यभूः।
भारतीवल्लकीझङ्कृतैर्झङ्कृतं
भूतले भाति मेऽनारतं भारतम्॥ 3॥

विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत्।
विश्वमेकं कुटुम्बं समालोकयत्
भूतले भाति मेऽनारतं भारतम्॥ 4॥

वेशभूषाशनोपासनापद्धति-
क्रीडनामोदसंस्कारवृत्त्यादिषु।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा
भूतले भाति तन्मामकं भारतम्॥ 5॥

अर्थकामान्वितं धर्ममोक्षान्वितम्
भक्तिभावान्वितं ज्ञानकर्मान्वितम्।
नैकमार्गैः प्रभुं चैकमाराधयद्
भूतले भाति मेऽनारतं भारतम्॥ 6॥



शोषितो नात्र कश्चिद् भवेत् केनचित्
व्याधिना पीडितो नो भवेत्कश्चन।
नात्र कोऽपि व्रजेद् दीनतां हीनतां
मोदतां राजतां पावनं भारतम्॥ 7॥

भारतं वर्तते मे परं सम्बलं
भारतं नित्यमेव स्मरामि प्रियम्।
भारतेनास्ति मे जीवनं जीवनं
भारतायार्पितं मेऽखिलं चेष्टितम्॥ 8॥



## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अखिलम्**<br>(वि०) | समस्तम् | समस्त | entire. |
| **अनारतम्**<br>(अव्य०) | सततम् | निरन्तर | always. |
| **अभिन्नम्**<br>(वि०) न भिन्नम् इति (नञ् त०पु०)<br>[भिद्+क्त](नपुं०) | सङ्घटितम् | (अन्दर से) एकरूप है | united. |
| **अर्थकामान्वितम्**<br>(वि०)[अर्थश्च कामश्च इति (द्व०स०)<br>ताभ्याम् अन्वितम् (तृ०त०पु०)] | अर्थेन कामेन च युक्तम् | अर्थ (धन) और काम (इच्छाओं) से युक्त | invested with artha and kama. |
| **अर्पितम्**<br>(वि०) [ऋ+णिच्+क्त, नपुं०] | प्रदत्तम् | अर्पित किया गया | offered. |
| **अर्बुदारावलीश्रेणिसम्पूजितम्**<br>(वि०) [अर्बुदश्च अरावली च इति<br>अर्बुदारावल्यौ (द्व०स०) तयो: श्रेण्य:<br>(ष०त०पु०) ताभि: सम्पूजितम् इति<br>(तृ०त०पु०)] | अर्बुदारावलीनामकाभि: पर्वतश्रेणिभि: पूजितम् | आबू और अरावली नामक पर्वत श्रेणियों से पूजित | worshipped by the Abu and Aravali ranges. |
| **आराधयत्**<br>(वि०)(आ+राध्+णिच्+शतृ प्र०ए०व०, नपुं०] | पूजयत् | आराधना करता हुआ | worshipping. |

| | | | |
|---|---|---|---|
| **उद्घोषयत्**<br>(वि०) [उत्+घुष्+शतृ (नपुं०)] | उच्चस्वरेण घोषणां कुर्वत् | उच्च स्वर से घोषणा करता हुआ | proclaiming loudly. |
| **क्रीडनामोदसंस्कारवृत्त्यादिषु**<br>(सं०)(स०ब०व०) क्रीडनं च आमोद: च संस्कार: च वृत्ति: च क्रीडनामोदसंस्कारवृत्तय: (द्व०) ता: आदौ येषां तेषु (ब०व्री०) | खेलन-मनोरञ्जन-संस्कार-व्यवहारादिषु | खेल, मनोरंजन, संस्कार तथा व्यवहार आदि में | in play, enterainment, samaskara and profession etc. |
| **चेष्टितम्**<br>(वि०)(चेष्ट्+क्त)(नपुं०) | व्यवहार: | कर्म | activities.. |
| **जाह्नवीचन्द्रभागाजलै:**<br>(नपुं ०) [जाह्नवी च चन्द्रभागा च इति जाह्नवीचन्द्रभागे (द्व०) तयो: जलै: (ष०त०पु०)] | गङ्गाचन्द्रभागानामकनद्यो: जलै: | गंगा तथा चनाब इत्यादि नदियों के जलों से | by the waters of the Ganges and the Chinab. |
| **ज्ञानकर्मान्वितम्**<br>(वि०) (नपुं० प्र०ए०व०] ज्ञानं च कर्म च ताभ्याम् अन्वितम् (तृ०त०पु०)] | ज्ञानकर्मभ्यां युक्तम् | ज्ञान और कर्म से युक्त | endowed with knowledge and action. |
| **झङ्कृतम्**<br>(वि०)[झम्+कृ+क्त,] | झङ्कारयुक्तम् | झनझनाता हुआ | Resounding. |
| **तुङ्गभद्राविपाशादिभि:**<br>(सं०) [तुङ्गभद्रा च विपाशा च इति तुङ्गभद्राविपाशे (द्व०) ते आदौ यासां ताभि: (ब०व्री०)] | तुङ्गभद्राविपाशानामक-प्रमुखाभि: नदीभि: | तुङ्गभद्रा तथा व्यास इत्यादि नदियों से | by the Tungabhadra Vipasa etc. rivers. |
| **धर्ममोक्षान्वितम्**<br>(वि०)(नपुं० प्र०ए०व०)[धर्म: च मोक्ष: च ताभ्याम् अन्वितम् (तृ०त०पु०)] | धर्ममोक्षाभ्यां युक्तम् | धर्म और मोक्ष से युक्त | endowed with Dharma & Moksha. |
| **पावयत्**<br>(वि०) [पू+णिच्+शतृ] (नपुं०) | पवित्रीकुर्वत् | पवित्र किया गया | sanctifying. |
| **पावितम्**<br>(वि०)[पू+णिच्+क्त](नपुं०] प्र०ए०व० | पवित्रीकृतम् | पवित्र किया गया | made sacred. |
| **भक्तिभावान्वितम्**<br>(वि०)(नपुं० प्र०ए०व०)[भक्ते: भाव: (सं०त०पु०) तेन अन्वितम् (तृ०त०पु०)] | भक्ते: भावै: पूर्णम् | भक्ति के भावों से परिपूर्ण | full of the feelings of devotion. |

| | | | |
|---|---|---|---|
| **भाति**<br>(क्रि०) (भा लट्० प्र० पु० ए०व०) | शोभते | सुशोभित होता है | glows. |
| **भानुजानर्मदावीचिभि:**<br>(सं०) (स्त्री०)(तृ०ब०व०]<br>[भानुजा च नर्मदा च इति भानुजानर्मदे (द्व०)<br>तयो: वीचिभि: (ष०त०पु०)] | यमुनानर्मदयो: नद्यो:<br>ऊर्मिभि: | यमुना और नर्मदा<br>नदियों की लहरों से | by the waves of the Yamuna and Narmada rivers |
| **भारतीवल्लकीझङ्कृतै:**<br>[भारत्या: वल्लकी (ष०त०पु०) तया झङ्कृतै:<br>(तृ०त०पु०)] | सरस्वत्या: वीणाया:<br>झङ्कृतै: | सरस्वती की वीणा<br>की झंकारों से | with the jingles of Saraswati's veena. |
| **भावितम्**<br>(वि०)(भू+णिच्+क्त)(नपुं० प्र०ए०व०) | गुञ्जितम् | गूँजता हुआ | echoed. |
| **भू:**<br>(सं०)(स्त्री० प्र०ए०व०) | पृथ्वी | धरती | Earth. |
| **भूतले**<br>(सं०)(नपुं० स०ए०व०) | धरतीतले | पृथ्वी पर | on the surface of the earth. |
| **रम्यसङ्गीतसाहित्यसौहित्यभू:**<br>(वि ०) [रम्यं सङ्गीतं (कर्मधा०, रम्यसङ्गीतं<br>च साहित्यं च (द्व०) तयो: सौहित्यस्य भू:<br>(ष०त०पु०)] | रम्यं सङ्गीतं साहित्यं च<br>एतयो: संवर्धनस्थली | रमणीय संगीत और<br>साहित्य के फलने<br>फूलने की भूमि | fit ground for the nurturing of charming music and literature. |
| **राजताम्**<br>(क्रि०)(राज् लो० प्र० पु०ए०व०) | सुशोभितम् | सुशोभित होवे | may it shine. |
| **लालितम्**<br>(वि०) (नपुं० प्र०ए०व०) | सुशोभितम् | सुशोभित | adorned. |
| **वर्तते**(क्रि०)<br>[वृत् (आ०) लट् प्र०पु०ए०व०] | भवति | होता है | becomes. |
| **विन्ध्यसह्याद्रिनीलाद्रिमालान्वितम्**<br>(वि०) [विन्ध्य: च सह्याद्रि: च नीलाद्रि:<br>च इति विन्ध्यसह्याद्रिनीलाद्रि-आदय: (द्व०)<br>तेषां माला (ष०त०पु०) तया अन्वितम् इति<br>(तृ०त०पु०)] | विन्ध्यसह्यनीलनामकानां<br>पर्वतानां श्रेणिभि: युक्तम् | विन्ध्य, सह्य, नील<br>पर्वत शृंखलाओं से<br>युक्त | enriched with the ranges of Vindhya, Sahya and Nila mountains. |

| | | | |
|---|---|---|---|
| **विश्वबन्धुत्वम्**<br>(सं०) (नपुं० प्र०ए०व०) [विश्वं प्रति बन्धुत्वम् (द्वि०त०पु०)] | सर्वदेशवासिनः प्रति भ्रातृभावः | संसार के सभी लोगों के प्रति भाईचारे की भावना | feeling of universal brotherhood. |
| **वेदभाभासितम्**<br>(वि०) (नपुं० प्र०ए०व०) [वेदानां भा (ष०त०पु०) तया भासितम् (तृ०त०पु०)] | वेदानां प्रभया प्रकाशितम् | वेदों के प्रकाश से आलोकित | resplendent with the glory of the Vedas. |
| **वेषभूषाशनोपासनापद्धतिक्रीडनामोद-संस्कारवृत्त्यादिषु**<br>वेशभूषा च अशनं च उपासनापद्धतिश्च क्रीडनं च आमोदश्च संस्कारवृत्तिश्च इति (द्व०), आदौ येषां तेषु (ब०व्री०) | परिधान-भोजन-पूजाविधि-खेलन-मनोरञ्जन-संस्कारवृत्ति-इत्यादिषु | वेष-भूषा, खानपान, अर्चनाविधि, खेलकूद, आमोद-प्रमोद के साधन, धार्मिक सामाजिक संस्कार एवं आजीविका इत्यादि में | in dresses, eating habits, modes of worship, sports, recreational activities, socio-religious ceremonies and occupations. |
| **शुभ्रहैमाद्रिहासप्रभापूरितम्**<br>(वि०) (नपुं० प्र०ए०व०) [हैमाद्रेः हासः (ष०त०) शुभ्रः हैमाद्रिहासः (कर्मधा०) तस्य प्रभा (ष०त०पु०) तया पूरितम् (तृ०त०पु०)] | हिमालयस्य श्वेतहास्य कान्त्या परिपूर्णम् | हिमालय के धवल हास की कान्ति से व्याप्त | brightened by the white smile of the Himalayas. |
| **सत्कलालालितम्**<br>(वि०) (नपुं० प्र०ए०व०) [सत्कलाभिः लालितम् (तृ०त०)] | श्रेष्ठकलाभिः शोभितम् | श्रेष्ठ (सुन्दर) कलाओं से सुशोभित | adorned with fine arts. |
| **समालोकयत्**<br>(नपुं०) [सम्+ आ+लोकृ +शतृ] | पश्यत् | देखता हुआ | beholding. |
| **सम्बलम्**<br>(सं०) [नपुं०, प्र०ए० व०] | आश्रयः | आश्रय, सहारा | refuge. |
| **हासप्रभापूरितम्**<br>(वि०) (नपुं०, प्र०ए० व०) [हासस्य प्रभा, हासप्रभा (ष०त०पु०) तया पूरितम् (तृ०त०)] | हासस्य आभया पूर्णम् | (हिमालय की सफेद बर्फरूपी) हँसी की चमक से भरा | full of the lustre of the laughter (of the Himalayas). |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| अर्बुदारावली | = | अर्बुद+अरावली | मेऽनारतम् | = | मे+अनारतम् |
| वीचिभिर्लालितम् | = | वीचिभिः+लालितम् | विश्ववन्द्यैश्चरित्रैः | = | विश्ववन्द्यैः+चरित्रैः |
| सदप्यस्त्यभिन्नम् | = | सत्+अपि+अस्ति+अभिन्नम् | यद्धि | = | यत्+हि |
| तन्मामकम् | = | तत्+मामकम् | नैकमार्गैः | = | न+एकमार्गैः |
| शोषितो नात्र | = | शोषितः+न+अत्र | कश्चिद् | = | कः+चिद् |
| भारतायार्पितम् | = | भारताय+अर्पितम् | | | |

## संयोगः

| | | | | | |
|---|---|---|---|---|---|
| विश्वबन्धुत्वमुद्घोषयत् | = | विश्वबन्धुत्वम्+उद्घोषयत् | विश्वमेकम् | = | विश्वम्+एकम् |
| समालोकयत् | = | सम्+आलोकयत् | नित्यमेव | = | नित्यम्+एव |

# अभ्यासः

1. **संस्कृतभाषया एकपदेन उत्तरं लिखत –**

(क) मम भारतं कुत्र भाति ? ..........................................

(ख) भारतं कस्य हासप्रभया पूरितम् अस्ति ? ..........................................

(ग) धरण्यां किं मोदताम् ? ..........................................

(घ) मम अखिलं चेष्टितं कस्मै अर्पितं भवेत् ? ..........................................

(ङ) अत्र कोऽपि कां न व्रजेत् ? ..........................................

(च) भारतं कया लालितं वर्तते ? ..........................................

(छ) अहं किं नित्यमेव स्मरामि ? ..........................................

(ज) भारतं जगत् कीदृशैः चरित्रैः पावयति ? ..........................................

**2. संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत –**

(क) अस्मिन् पाठे केषां पर्वतानाम् उल्लेखः अस्ति ?

..............................................................................................................

(ख) भारतस्य पञ्चनदीनां नामानि लिखत।

..............................................................................................................

(ग) भारतदेशः संसारं कैः पावयति ?

..............................................................................................................

(घ) भारतं कैः झङ्कृतं वर्तते ?

..............................................................................................................

(ङ) मम भारतं कैः अन्वितं वर्तते ?

..............................................................................................................

**3. अधोलिखितेषु कथनेषु स्थूलाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –**

(क) मम भारतं **पर्वतश्रेणिभिः** सम्पूजितं वर्तते।

..............................................................................................................

(ख) भारते **गङ्गायमुनादयः** नद्यः वहन्ति।

..............................................................................................................

(ग) भारतं **सत्कलाभिः** लालितम् अस्ति।

..............................................................................................................

(घ) भारतं **विश्वं** कुटुम्बवत् आलोकयति।

..............................................................................................................

(ङ) भारते भिन्नाः **संस्कृतयः** सन्ति तथापि भारतम् अभिन्नम् अस्ति।

..............................................................................................................

(च) भारते जनाः **अनेकमार्गैः** प्रभुम् आराधयन्ति।

..............................................................................................................

(छ) अत्र जनाः **व्याधिना** पीडिताः न भवेयुः।

..............................................................................................................

(ज) भारतेन **मह्यं** शुभाः प्रेरणाः प्रदत्ताः।

..............................................................................................................................

(झ) अहम् **अनेककर्माणि** कुर्वन् भारतस्य गीतानि गायामि।

..............................................................................................................................

(ञ) मम सर्वाणि चेष्टितानि **भारताय** अर्पितानि।

..............................................................................................................................

**4. अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'भूतले भाति मेऽनारतं भारतम्।' अस्मिन् वाक्ये क्रियापदं किम्?

(ख) 'मोदतां राजतां पावनं भारतम्।' अस्मिन् वाक्ये 'राजताम्' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?

(ग) 'भारतं वर्तते मे परं सम्बलम्।' अत्र 'मम' इत्यर्थे किं पदं प्रयुक्तम्?

(घ) 'भारतं नित्यमेव स्मरामि प्रियम्।' अत्र 'यदा-कदा' इत्यनयोः पदयोः किं विलोमपदं प्रयुक्तम्?

(ङ) 'भारतायार्पितं मेऽखिलं चेष्टितम्।' अत्र 'चेष्टितम्' इति पदस्य किं विशेषणपदं प्रयुक्तम्?

(च) 'भूतले भाति तन्मामकं भारतम्' अत्र 'मामकम्' इति पदस्य कि विशेष्यपदं प्रयुक्तम्?

**5. अधोलिखितवाक्यानाम् अर्थत्रयात् सर्वोचितम् अर्थं चिनुत –**

(क) **भारतं वर्तते मे परं सम्बलम्**

(i) भारतं मह्यं पर बलं ददाति।

(ii) मम भारतदेशः अतीव शक्तिशाली वर्तते।

(iii) भारतं मम परमः आश्रयः अस्ति।

(ख) **नात्र कोऽपि व्रजेत् दीनताम्**

(i) अस्मिन् भारते कोऽपि नरः दीनः न भवेत्।

(ii) अस्मिन् भारते कोऽपि दीनस्य समीपे न गच्छेत्।

(iii) भारतदेशे दुष्टः दैन्यं प्राप्नुयात्।

(ग) **येन मह्यं प्रदत्ताः शुभाः प्रेरणाः**

(i) भारताय अहं प्रेरणां दास्यामि।

(ii) भारतं मह्यं सदा शोभनाः प्रेरणाः ददाति।

(iii) भारतेन सुन्दराः प्रेरणाः विदेशेभ्यः दत्ताः।

6. **मञ्जूषायां प्रदत्तानां विशेषणविशेष्यपदानां मेलनं कृत्वा शब्दयुग्मानि लिखत –**

**यथा** – भारतं सम्बलम्

भारतं, पावनम्, एकं, चेष्टितं, सम्बलं, केनचित्, अखिलं, व्याधिना, विश्ववन्द्यैः, प्रभुं, विश्वबन्धुत्वम्।

| विशेषणानि | विशेष्याणि |
|---|---|
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |

7. **शब्दार्थैः सह मेलनं कृत्वा लिखत–**

| | | | | |
|---|---|---|---|---|
| (क) | अनारतम् | .............................. | (i) | संवर्धनस्थली |
| (ख) | भानुजा | .............................. | (ii) | पवित्रीकृतम् |
| (ग) | सौहित्यभूः | .............................. | (iii) | प्रकाशितम् |
| (घ) | वल्लकी | .............................. | (iv) | सततम् |
| (ङ) | भासितम् | .............................. | (iv) | वीणा |
| (च) | पावितम् | .............................. | (iv) | यमुना |

8. **अधोलिखिताः श्लोकपङ्क्तीः पूरयत –**

(क) विश्वमेकं .............................. समालोकयत्।

(ख) वेदभा .............................. सत्कला ..............................।

(ग) अर्बुद .............................. श्रेणि ..............................।

(घ) जाह्नवी .............................. जलैः ..............................।

(ङ) .............................. भाति मे .............................. भारतम्।

9. **अधोदत्तं अन्वयं शतृप्रत्ययान्तपदैः पूरयत –**

पावनं विश्वबन्धुत्वम् .............................., विश्ववन्द्यैः चरित्रैः जगत् .............................., विश्वम् एकम् कुटुम्बकम् .............................., मे भारतम् भूतले अनारतम् भाति।

# अन्वयः

1. **अन्वयः** – विन्ध्य–सह्य–अद्रि–नील–अद्रि–माला–अन्वितम् शुभ्र–हैम–अद्रि–हास–प्रभा–पूरितम्, अर्बुद–अरावली–श्रेणि–सम्पूजितम् मे भारतं भूतले अनारतम् भाति।
2. **अन्वयः** – जाह्नवी–चन्द्रभागा–जलैः पावितम्, भनुजा–नर्मदा–वीचिभिः लालितम्, तुङ्गभद्रा–विपाशा–आदिभिः भावितम्, मे भारतं भूतले अनारतम् भाति।
3. **अन्वयः** – वेद–भा–भासितम् सत्कलालालितम् रम्य–सङ्गीत–साहित्य–सौहित्य–भूः भारती–वल्लकी–झङ्कृतैः झङ्कृतम् मे भारतं भूतले अनारतम् भाति।
4. **अन्वयः** – पावनम् विश्वबन्धुत्वम् उद्घोषयत्, विश्व–वन्द्यैः चरित्रैः जगत् पावयत्, विश्वम् एकम् कुटुम्बम् समालोकयत् मे भारतं भूतले अनारतम् भाति।
5. **अन्वयः** – वेष–भूषा–अशन–उपासना–पद्धति–क्रीडन–आमोद–संस्कार–वृत्ति–आदिषु यत् हि भिन्नम् सत् अपि सदा अभिन्नम् अस्ति, तत् मामकं भारतं भूतले भाति।
6. **अन्वयः** – अर्थ–काम–अन्वितम्, धर्म–मोक्ष–अन्वितम्, भक्ति–भाव–अन्वितम्, ज्ञान–कर्म–अन्वितम्, नैकमार्गैः च एकम् प्रभुम् आराधयत्, मे भारतं भूतले अनारतम् भाति।
7. **अन्वयः** – अत्र केनचित् कश्चित् शोषितः न भवेत्, कश्चन व्याधिना पीडितः न भवेत्, अत्र कः अपि दीनताम् हीनताम् (च) न व्रजेत्। पावनम् भारतं भूतले मोदताम् राजताम्।
8. **अन्वयः** – भारतम् मे परम् सम्बलम् वर्तते। (अहम्) प्रियम् भारतम् नित्यम् एव स्मरामि। भारतेन मे जीवनम् जीवनम् अस्ति। मे अखिलम् चेष्टितम् भारताय (एव) अर्पितम् (अस्ति)।

# योग्यताविस्तारः

**(क) ग्रन्थपरिचयः–**

डा० रमाकान्तशुक्लप्रणीतगीतिकाव्यम् 'भाति मे भारतम्' अनेकवारं दूरदर्शनात् सचित्रं प्रसारितम्।

**(ख) भावविस्तारः**

**(1) भारतस्य सरितः**

**गङ्गा** – भागीरथी, जाह्नवी आदिनामभिः प्रसिद्धा नदी हिमालयात् उद्गमनात् परं 1560 मीलकं पूर्वं वहन्ती महोदधौ 'बंगाल की खाड़ी' इति स्थाने पतति। भगीरथः एतां सगरस्य षष्टिसहस्रपुत्रान् समुद्धर्तुं स्वर्गात् भूमिम् आनयत्।

**यमुना** – भानुजा, कालिन्दी, सूर्यपुत्री इति ज्ञाता हिमालये कलिन्दपर्वतात् उत्पद्यते।

**चन्द्रभागा** – चन्द्रस्य स्पर्शात् अमृततुल्यं जलं वहन्ती हिमालयात् निःसृत्य पश्चिमसमुद्रे पतति 'चनाब' इति नाम्ना प्रसिद्धा।

**नर्मदा** – दक्षिणप्रदेशीया पुण्यमयी नदी चन्द्रवंशीयहिरण्यतेजसः तपसा पृथिव्यामवतारिता जाता।

**तुङ्गभद्रा** – सह्यनामकात् पर्वतात् उद्गच्छति।

**विपाशा** – पाशमुक्तकारिणी 'व्यास' नाम्ना पञ्जाबदेशस्य प्रमुखा नदी।

**(2) भारतस्य प्रसिद्धाः भूधराः**

**पर्वतः** – पर्वभिः युक्त इति पर्वतः। भुवं धारयति अतः भूधरः, महीधरः इति कथ्यते। कथम् इति चिन्तयाम।

**विन्ध्यः** – भूमेः वेधनं कृत्वा भारतस्य मध्यभागे स्थितः।

**सह्याद्रिः** – पश्चिमीतटीयपर्वतशृङ्खला सप्तकुलपर्वतेषु गण्यते।

**महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः।**
**विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥ (विष्णुपुराणात्)**

**नीलाद्रिः** – इलावृत्तखण्डस्य पर्वतोऽयं 'नीलम' इति रत्नवत् दीव्यति।

**अरावलिः** – राजस्थानस्य प्रमुखा पर्वतश्रेणी इयं दिल्लीपर्यन्तं विस्तृता।

**अर्बुदः** – 'आबू' इति प्रसिद्धा पर्वतशृङ्खला राजस्थाने प्रसिद्धा।

**हिमाद्रिः** – पर्वतराजहिमालयः यस्य हिमं शिवस्य अट्टहास इव वर्णितं कालिदासेन।

**(3) सम्बद्धाः सूक्तयः**

**(अ) सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्**

**(आ) मन्दिरैर्मस्जिदैश्चैत्यगिर्जागृहै–**
**रार्यगेहैगुरुद्वारकैर्भ्राजितम्।**
**कर्मभूः शर्मभूर्धर्मभूर्मर्मभूः**
**भूतले भाति मेऽनारतं भारतम्॥**

**यत्र मन्दाकिनी पापसंहारिणी,**
**यत्र गोदावरी चारुसञ्चारिणी,**
**देववाणी च यत्रास्ति मोदाकुला**
**भूतले भाति मेऽनारतं भारतम्॥**

## (ग) भाषाविस्तारः

**(अ) अधोलिखितवाक्येषु स्थूलाङ्कितपदानाम् अर्थभेदम् जानीहि–**

(1) (क) नृपः प्रजाः **आराधयत्**।
(ख) धेनुम् **आराधयत्** गोपवृन्दं सुखमन्वभवत्।

(2) (क) जनसमूहः महोत्सवं **समालोकयत्**।
(ख) निर्माणकार्यं **समालोकयत्** निरीक्षकद्वयम् अतुष्यत्।

(3) (क) होमधूमः सर्वाः दिशः **अपावयत्**।

(ख) स्वचरणैः गृहं **पावयत्** योगित्रयम् उपादिशत्।

(4) (क) प्रधानाचार्यः विजयिच्छात्रेभ्यः पुरस्कारान् **उद्घोषयत्।**

(ख) क्रीडाङ्गणे मित्रस्य विजयम् **उद्घोषयत्** तन्मित्रम् हर्षध्वनिम् अकरोत्।

**(आ) अधोलिखितवाक्यद्वयस्य स्थाने एकं वाक्यं लिखितम् अत्र। एवमेव स्वयं वाक्यनिर्माणं कुरुत–**

(क) सः मार्गे गच्छति, स वृक्षं स्पृशति।

सः मार्गे गच्छन् वृक्षं स्पृशति।

(ख) अहं पत्रं लिखामि, अहं सङ्गीतं शृणोमि।

अहं पत्रं लिखन् सङ्गीतं शृणोमि।

(ग) बालिका लिखति, बालिका गायति।

बालिका लिखन्ती गायति।

(घ) गवां वृन्दं चरति, गवां वृन्दम् अग्रे गच्छति।

गवां वृन्दं चरत् अग्रे गच्छति।

## कोऽहं वदतु साम्प्रतम्

**वस्त्रनिर्माणकुशलः, गान्धिनाप्यभिनन्दितः।**
**शैत्यापहारिणामग्र्यः मम नाम अभिधीयताम्॥**

**भावार्थः** – मया वस्त्रं निर्मितं भवति, गान्धिना वस्त्रवयने मम प्रयोगः कृतः, शैत्यं नाशयामि, अहं कः? मां परिचिनुत।

## एहि हसाम

**(द्वयोः काकयोः परस्परं वार्तालापः भवति)**

**प्रथमः काकः** – बहिः आतपे मा गच्छ।

**द्वितीयः काकः** – किमर्थम्?

**प्रथमः काकः** – आतपकारणात् तव वर्णः कृष्णः भवेत्।

*इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।*
*एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥*

एक ही सत्यरूप परमेश्वर का विद्वज्जन विविध प्रकार से वर्णन करते हैं। उसी को (ऐश्वर्य सम्पन्न होने पर) इन्द्र, (हितकारी होने से) मित्र, (श्रेष्ठ होने से) वरुण तथा (प्रकाशक होने से) अग्नि कहा गया है। वास्तव में, वह (परमात्मा) सुपर्ण तथा गरुत्मान् (एक) है ॥

**ऋग्वेद 1.164.46**

**Central Board of Secondary Education**
Shiksha Sadan, 17, Rouse Avenue, Institutional Area, Opposite Bal Bhawan, New Delhi-110002